योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ११२

द्वादशोत्तरशततमः सर्गः ११२

श्रीवसिष्ठ उवाच ।

यस्मिंस्तस्मिन्पदार्थे हि येन तेन यथा तथा ।

तीव्रसंवेगसंपन्नं मनः पश्यति वाञ्छितम् ।। १

जायते म्रियते चैषा मनसस्तीव्रवेगिता ।

सौम्याम्बुबुद्बुदालीव निर्निमित्ता स्वभावतः ।। २

शीतता तुहिनस्येव कज्जलस्येव कृष्णता ।

लोलता मनसो रूपं तीव्रातीव्रैकरूपिणी ।। ३

श्रीराम उवाच ।

कथमस्यातिलोलस्य वेगो वेगैककारणम् ।

चलता मनसो ब्रह्मन्बलतो विनिवार्यते ।। ४

श्रीवसिष्ठ उवाच ।

नेह चञ्चलताहीनं मनः क्वचन दृश्यते ।

चञ्चलत्वं मनोधर्मो वह्नेर्धर्मो यथोष्णता ।। ५

यैषा हि चञ्चला स्पन्दशक्तिश्चित्तत्वसंस्थिता ।

तां विद्धि मानसीं शक्तिं जगदाडम्बरात्मिकाम् ।। ६

स्पन्दास्पन्दादृते वायोर्यथा सत्तैव नोह्यते ।

तथा न चित्तसत्तास्ति चञ्चलस्पन्दनादृते ।। ७

यत्तु चञ्चलताहीनं तन्मनो मृतमुच्यते ।

तदेव च तपःशास्त्रसिद्धान्तो मोक्ष उच्यते ।। ८

मनोविलयमात्रेण दुःखशान्तिरवाप्यते ।

मनोमननमात्रेण दुःखं परमवाप्यते ।। ९

दुःखमुत्पादयत्युच्चेरुत्थितश्चित्तराक्षसः ।
सुखायानन्तभोगाय तं प्रयत्नेन पातय ।। १०

तस्य चञ्चलता यैषा त्वविद्या राम सोच्यते ।
वासनापदनाम्नीं तां विचारेण विनाशय ।। ११
अविद्यया वासनया तयान्तश्चित्तसत्तया ।
विलीनया त्यागवशात्परं श्रेयोऽधिगम्यते ।। १२
यत्तत्सदसतोर्मध्यं यन्मध्यं चित्त्वजाड्ययोः ।
तन्मनः प्रोच्यते राम द्वयोर्दोलायिताकृति ।। १३
जाड्यानुसंधानहतं जाड्यात्मकतयेद्धया ।
चेतो जडत्वमायाति दृढाभ्यासवशेन हि ।। १४
विवेकैकानुसंधानाच्चिदंशात्मतया मनः ।
चिदेकतामुपायाति दृढाभ्यासवशादिह ।। १५
पौरुषेण प्रयत्नेन यस्मिन्नेव पदे मनः ।
पात्यते तत्पदं प्राप्य भवत्यभ्यासतो हि तत् ।। १६
पुनः पौरुषमाश्रित्य चित्तमाक्रम्य चेतसा ।
विशोकं पदमाश्रित्य निराशङ्कः स्थिरो भव ।। १७
भवभावनया मग्नं मनसैव न चेन्मनः ।
बलादुत्तार्यते राम तदुपायोऽस्ति नेतरः ।। १८
मन एव समर्थं वो मनसो दृढनिग्रहे ।
अराजा कः समर्थः स्याद्राज्ञो राघव निग्रहे ।। १९
तृष्णाग्राहगृहीतानां संसारार्णवरंहसि ।
आवर्तैरुह्यमानानां दूरे स्वं मन एव नौः ।। २०
मनसैव मनश्छित्त्वा पाशं परमबन्धनम् ।
उन्मोचितो न येनात्मा नासावन्येन मोक्ष्यते ।। २१
या योदेति मनोनाम्नी वासना वासितान्तरा ।

तां तां परिहरेत्प्राज्ञस्ततोऽविद्याक्षयो भवेत् ।। २२

भोगौघवासनां त्यक्त्वा त्यज त्वं भेदवासनाम् ।

भावाभावौ ततस्त्यक्त्वा निर्विकल्पःसुखीभव ।।२३

अभावनं भावनायास्त्वेतावान्वासनाक्षयः ।

एष एव मनोनाशस्त्वविद्यानाश उच्यते ।। २४

यद्यत्संवेद्यते किंचित्तत्रासंवेदनं परम् ।

असंवित्तिस्तु निर्वाणं दुःखं संवेदनाद्भवेत् ।। २५

स्वेनैव तत्प्रयत्नेन पुंसः संवेद्यते क्षणात् ।

भावस्याभावनं भूत्यै तत्तस्मान्नित्यमाहरेत् ।। २६

रागादयो ये मनसीप्सितास्ते

बुद्ध्वेह तांस्तांस्त्वमवस्तुभूतान् ।

त्यक्त्वा तदास्याङ्कुरमस्तबीजं

मा हर्षशोकं समुपैहि तृप्तः ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० उ० मुखरवेणोपदेशांशकथनं नाम द्वादशोत्तरशततमः सर्गः ।।

११२ ।।